# READING - 8

श्रीरामस्याभिषेकं श्रुत्वा सर्वे जना नन्दिता अभवन् । वस्तुतो ऽयोध्यानन्दस्य सागरे निमग्नेवादृश्यत । दशरथस्य ज्येष्ठा भार्या कौसल्या नाम मम पुत्रो राजेति मत्वा परमं सुखमन्वभवत् । अथ वृद्धस्य राज्ञो ऽन्या भार्या कैकेयी नामासीद् यस्याः पुत्रो भरतः । पुरा कस्मिंश्चित्समये सा दशरथस्य महान्तमुपकारं कृत्वा राज्ञो द्वौ वरौ प्राप्तवती । ततस्तु तौ वरौ न कदापि कैकेय्या वृतावास्ताम् । अधुना तु सा वरावनुस्मृत्य दशरथस्य समीपं गत्वा वचनमब्रवीत् । जयत्वार्यपुत्रः । अप्यनुस्मरत्यार्यपुत्रो मद्द्वौ वरौ वृणीष्वेत्यात्मनो वचनम् । राजा क्षणमेकं चिन्तयित्वावदत्स्मरामि प्रिये स्मरामि यदिच्छसि तद्ब्रूहीति । प्रथमेन वरेण मम पुत्रो भरतो राज्ये ऽभिषिक्तो भवतु । द्वितीयेन च रामो ऽयोध्यां परित्यज्य वनं गच्छत्वित्युक्तवती कैकेयी । तस्यास्तद्वचनं श्रुत्वा दशरथो मूढ इव क्षणमुपविश्याशन्या हतो वृक्ष इव भूमावपतत् ॥